6th Semester BA (CBCSS)

Core Course in Sanskrit Special Vedanta

CODE IX वेदान्तपरिभाषा

## I. पदेनैकेन उत्तरं लिखत। 1-16

1. सच्चिदानन्दविग्रहः कः ?
2. परमपुरुषार्थः कः?
3. प्रमाकरणं किम्?
4. प्रमात्वस्य लक्षणे अबाधितपदं किमर्थम् ?
5. अद्वैते प्रत्यक्षप्रमा नाम किम् ?
6. विषयचैतन्यस्य दृष्टान्तं लिखत?
7. अन्तःकरणावच्छिन्नं चैतन्यं किम्
8. प्रातिभासिकं रजतं कुत्र वर्तते ?
9. अनुमानं किम्?
10. न्ययसाध्यमनुमानं किम् ?
11. वाक्यजन्यज्ञाने कति कारणानि ? कानि च तानि?
12. करणश्रवणे कस्य जिज्ञासाविषयत्वम्?
13. लक्षणाबीजं किम्?
14. सोऽरोदीत् इत्यादिवाक्यानां कुत्र लक्षणा?
15. प्रमाणानां प्रामाण्यं कतिविधम् ?
16. सृष्टिवाक्यानां कुत्र तात्पर्यम् ?

## II. वाक्येन वाक्याभ्यां वा पश्नानामुत्तरं लिखत – (17-24)

17. मोक्षस्य नित्यत्वं कथमवगम्यते ?
18. नैयायिकाः धारावाहिकबुद्धिस्थले प्रमालक्षणस्य अव्याप्तिं कथं वारयन्ति?
19. अद्वैतमतानुसारं मिथ्याभूतस्य घटज्ञानस्य प्रमाणत्वं कथम्?
20. वृत्तिरूपज्ञानस्य मनोधर्मत्वे किं मानम्?
21. तत्त्वमसि इति वाक्यजन्यज्ञानस्य कथं प्रत्यक्षत्वम्?
22. कार्यविनाशः कथं भवति?
23. व्याप्तिः नाम का ? सा कथं जायते?

24. आकाङ्क्षा नाम किम्?

## III. चतुर्णामुत्तरं लघूपन्यासरूपेण लिखत – (25-30)

25. मनसः इन्द्रियत्वं निराकुरुत।
26. मिथ्यात्वलक्षणं विचारयत।
27. उपमानलक्षणं सदृष्टान्तमुपपादयत।
28. त्रिविधलक्षणां सोदाहरणं लिखत।
29. परिभाषाकारसम्मतं तात्पर्यलक्षणं किम्?
30. अद्वितीयब्रह्मप्राप्तौ सृष्टिवाक्यानां कथमुपयोगः?

## IV. द्वौ उपन्यसत (31-33)

31. ज्ञानगतप्रत्यक्षत्वस्य प्रयोजकं किमिति परिभाषानुसारं विशदयत।
32. प्रातिभासिकरजतोत्पत्तिः कथमिति विशदयत।
33. वेदान्तपरिभाषानुसारं जगतः जन्मक्रमं निरूपयत।

## Answers and Keys

1. परमात्मा।
2. मोक्षः।
3. प्रमाणम्।
4. भ्रमज्ञाने अतिव्याप्तिवारणाय।
5. चैतन्यम्।
6. घटाद्यवच्छिन्नं चैतन्यम्।
7. जीवः।
8. अविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये।
9. अनुमितिकरणम्।
10. परार्थम्।
11. चत्वारि।
12. इतिकर्तव्यतायाः।
13. तात्पर्यानुपपत्तिः।
14. निन्दितत्वे।
15. द्विविधम्।
16. अद्वितीयब्रह्मणि।

17. न सपुनरावर्तते इति श्रुत्या मोक्षस्य नित्यत्वावगमात्, धर्मार्थकामानां प्रत्यक्षेण – तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादिश्रुत्या अनित्यत्वावगमाच्च मोक्षस्य नित्यत्वं गम्यते।
18. धारावाहिकबुद्धिस्थले पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविषयकत्वेन द्वितीयक्षणविशिष्टादिज्ञाने अधिगतत्वाभावात् नाव्याप्तिदोषः।
19. प्रमालक्षणे प्रोक्तस्य अबाधितपदस्य संसारदशायामबाधितत्वं विवक्षितमित्यतः घटज्ञानस्य प्रमाणत्वम्।
20. वृत्तिरूपज्ञानस्य मनोधर्मत्वे कामः सङ्कल्पो विचिकित्सा श्रद्धा अश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मनः एव इति श्रुतिर्मानम्। धीरिति शब्देन वृत्तिरूपज्ञानमुक्तम्।
21. तत्त्वमसि इति वाक्यजन्यज्ञाने प्रमातुः विषयतया प्रमाणप्रमेयचैतन्ययोः अभेदस्य सत्त्वात् वाक्यजन्यज्ञानस्य प्रत्क्षत्वम्।
22. कार्यविनाशः द्विविधः भवति। कश्चित् उपदानकारणेन सह नश्यति। कश्चित् विद्यमने एव उपादाने।
23. अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरणरूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन जायते।
24. पदार्थानं परस्परजिज्ञासाविषयत्वयोग्यत्वम् आकाङ्क्षा।

III.

25. मनः षष्ठानीन्द्रियाणि इति भगवद्गीतावचनेन मनसः इन्द्रियत्वं सिद्ध्यति इति मते परिभाषाकारः विप्रतिपद्यते। इन्द्रियगतसङ्ख्यापूरणमिन्द्रियेण एव भवेत् इति नियमः नास्ति। यथा यजमानाः इडां भक्षयन्ति इत्यत्र ऋत्विग्गतपञ्चत्वसङ्ख्या अनृत्विजा यजमानेन पूर्यते, यथा वा वेदानध्यापयामास महाभारतपञ्चमान् इत्यर् वेदगतपञ्चत्वसङ्ख्या वेदभिन्नेन महाभारतेन पूर्यते तथैव इन्द्रियभिन्नेन मनसा इन्द्रियगता षष्ठसङ्ख्यापूरणम्। इन्द्रियेभ्यः परा ह्यर्थाः अर्थेभ्यश्च परं मनः इत्यादिश्रुत्या मनसः इन्द्रियभिन्नत्वं स्पष्टं भवति। अतः मनः नेन्द्रियम् इति वेदान्तपरिभाषाकारमतम्।
26. स्वश्रयत्वेनाभिमतयावन्निष्ठात्यन्ताभावप्रतियोगित्वं भवति मिथ्यात्वम्। अत्र अभिमतपदं वस्तुतः स्वाश्रयाप्रसिद्ध्या असम्भववारणाय। यावत्पदम् अर्थान्तरवाणाय।
27. सादृश्यप्रमाकरणं भवति उपमानम्। नगरेषु दृष्टगोपिण्डः पुरुषः वनंगतः गवयेन्द्रयसन्निकर्षे सति भवति प्रतीतिः यदयं पिण्डः गोसदृशः इति। तदनन्तरं मदीया गौः अनेन सृशी इति निश्चयो जायते। अत्र गवयनिष्ठगोसादृश्यज्ञानं करणम्।
28. जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति लक्षणा त्रिविधा। यत्र शक्यमनन्तर्भाव्य अर्थान्तरप्रतीतिः तत्र जहल्लक्षणा। यथा विषं भुङ्क्ष्वेति। तत्र च स्वार्थं विहाय शत्रुगृहभोजननिवृत्तिः लक्ष्यते। यत्र शक्यार्थम् अन्तर्भाव्य अर्थान्तरप्रतीतिः तत्राजहल्लक्षणा । यथा शुक्लो पटः। अत्र शुक्लशब्दः स्वार्थं शुक्लगुणमनन्तर्भाव्य एव तद्वति द्रव्ये लक्षणया वर्तते। यत्र हि विशिष्टवाचकशब्दः एकदेशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा। यथ सोऽयं देवदत्तः तत्त्वमसि इत्यादिवाक्ये इति साम्प्रदायिकाः।
29. तत्प्रतीतीच्छया उच्चरितत्वं तात्पर्यमिति तात्पर्यस्य प्राचीनोक्तलक्षणम्। तत् न समीचीनम्। अर्थज्ञानशून्येन उच्चरितवाक्यदपि व्युत्पन्नः पुरुषः अर्थं जानीयात्। ईश्वरेच्छया तत्र अर्थबोध इत्येतत् नोचितं, ईश्वरानङ्कीकर्तुरपि अर्थबोधात्। अतः तत्प्रतीतिजननयोग्यत्वं तात्पर्यम् इति लक्षणं

क्रियते। सैन्धवमानय इत्यादिषु अपि लक्षणसमन्वयाय यद्वाक्यं यत्प्रतीतिजनकस्वरूपयोग्यत्वे सति यदन्यप्रतीतीच्छया नोच्चरितं तद्वाक्यं तत्संसर्गपरमिति उच्यते।

30. यदि सृष्टिमनुपन्यस्य प्रपञ्चस्य निषेधः ब्रह्मणि प्रतिपाद्येत, तदा निषिद्धस्य प्रपञ्चस्य वायौ प्रतिषिद्धस्य रूपस्येव ब्रह्मणोऽन्यत्रावस्थानशङ्कायां न निर्विचिकित्समद्वितीयत्वं प्रतिपादितं स्यात्। ततः सृष्टिवाक्यात् ब्रह्मोपादायत्वज्ञाने सत्युपादानं विना कार्यस्य अन्त्र सद्भावशङ्कायः निरस्ततया नेति नेतीत्यादिना ब्रह्मणि अपि तस्य  असत्त्वोपपादने प्रपञ्चस्य तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रममखण्डसच्चिदानन्दैकरसं ब्रह्म सिद्ध्यतीति परम्परया सृष्टिवाक्यानामद्वितीये ब्रह्मणि एव तात्पर्यम्।

IV.

31. प्रमाणचैतन्यस्य विषयचैतन्याभेदः। उभयोरपि चैतन्ययोः एकदेशवृत्तित्वमपेक्षितमम्। अन्तःकरणवत्तित्वात् अहं सुथीत्यादिप्रत्यक्षम्। सुखस्मरणे अतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणम्। वर्तमानधर्माधर्मादौ अतिव्याप्तिवारणाय योग्यत्वपदम्। अन्ते च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं सति तत्तद्वृत्तयवच्छिन्ननस्य तत्तदंशे प्रत्यक्षत्वम् इति विशदं लक्षणम्।

32. लोकसिद्धरजतसामग्री न प्रातिभासिकरजतम् उत्पादयति। कथं तदुत्पद्यते इति विशदीकरोति परिभाषाकारः – काचादिदोषदूषितलोचनस्य पुरोवृत्तिद्रव्यसंयोगात् इदमाकारा चाकचिक्याकारा च काचिदन्तःकरणवृत्तिः जायते। तत्र इदमवच्छिन्नं चैतन्यं प्रतिबिम्बते। तत्र इन्द्रियद्वारा अन्तःकरणवृत्तेः बहिर्निर्गमनेन इदमवच्छिन्नं चैतन्यं वृत्त्यवच्छिन्नं चैतन्यं प्रमातृचैतन्यं चाभिन्नं भवति। ततश्च प्रमातृचैतन्याभिन्नविषयचैतन्यनिष्ठा शुक्तित्वकारिका अविद्या चाकचिक्यसादृश्यसन्दर्शनसमुद्बोधितरजतादसंस्कारसहकृता काचादिदोषसमवहिता रजतरूपार्थाकारेण रजतज्ञानाकारेण च परिणमते।

प्रातिभासिकं रजतम् अविद्यापेक्षया परिणामः। चैतन्यापेक्षया विवर्तः च भवति। अविद्यापरिऑणामिदं रजतमविद्याधिष्ठाने इदमवच्छिन्नचैतन्ये वर्तते। यतः वेदान्तसिद्धान्तानुसारं सर्वमपि कार्यं स्वापादाने अविद्याधिष्ठाने आश्रितं भवति।

अत्र संशयः। रजतं चैतन्यनिष्ठम्। तथा सति कथं तस्य इदं रजतमिति पुरोवर्ति तादात्म् संभवति। समाधानमुच्यते – नैयायिकाः यथा आत्मनिष्ठं सुखादिकं शरीरनिष्ठमिति अङ्गीकुर्वन्ति तथैव समस्तं चैतन्यमपि रजताधिष्ठानमित्यतः इदमवच्छिन्नस्य  तदधिष्ठानत्वेन इदमः अवच्छेदकतया रजतस्य पुरोवर्तिसंसर्गप्रत्ययः जायते।  विषयचैतन्यं तदन्तःकरणोपहितचैतन्याभिन्नमित्यतः विषयचैतन्ये अध्यस्तमपि रजतं साक्षिण्यध्यस्तं केवलसाक्षिवेद्यमिति च उच्यते।

रजतं साक्षिण्यध्यस्तमिति उक्ते पुनः संशयः – तथा सति अहं सुखीतिवत् अहं रजतमिति प्रतीतिः कुतो न भवति इति। तत्समाधानमपच्यते- अहं सुखीति ज्ञानं अन्तःकरणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तं न भवति अहं सुखीति ज्ञानम्, यतः सुखादयः घटादिविषयवत् शुद्धचैतन्ये एव अध्यस्ताः भवन्ति। । यस्य

यदाकारानुभवाहितसंस्कारसहकृताविद्याकार्त्वं तस्य तदाकारानुभवविषयत्वमिति अस्ति नियमः। तथा सति इदमाकारानुभवसंस्कारसहिताविद्याकार्यत्वात् घटादेः इदमिति अनुभवविषयत्वम्। तथा च अन्तःकरणस्य अहमाकारानुभवसहकृताविद्याकार्यत्वात् अन्तःकरणादेः अहमाकारानुभवविषयत्वम्। शरीरादीनामुभयविधानुभवसंस्कारसहिताविद्याकार्यत्वात् अहमनुबवविषयत्वम्। तथा चोभयविधानुभवः इदं शरीरमयं देहः इत्याद्याकारः। अत्र प्रातिभासिकरजतस्य प्रमातृचैतन्याभिन्नेदमवच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वे अपि इदं रजतमिति सत्यस्थलीयेदमाकारानुभवाहितसंस्कारजन्यत्वात् इदमाकारानुङ्ववविषयता, न त्वहं रजतमिति अहङ्कारानुभवविषयता।

पुनरत्र संशयः - रजतमिदमिति मिथ्याप्रत्ययः साक्षात्संबन्धित्वेन भासेत इत्यतः रजतगोचरज्ञानाभासरूपा अविद्यावृत्तिः किमर्थमभ्युपगम्यते इति। विषयप्रत्यक्षतायै विषयस्य प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः आवश्यकः इत्यतः रजतस्य अपरोक्षतासिद्धये वृत्तिः अभ्युपगम्यते। गुरुमते इदंवृत्तेः रजताकारवृत्तेः च प्रत्येकमेकैकविषयतास्वीकरात् विशिष्टज्ञानाभ्युपगमे भ्रमसिद्धिः कथमिति पुनः संशयः। तत्र समाधानमेवमुच्यते - वृत्तिद्वयप्रतिबिम्बितचैतन्यस्यैकस्य सत्यमिथ्यावस्तुतादात्म्यावगाहित्वेन भ्रमत्वस्वीकारात्। तस्मादेव प्राचीनचार्याः साक्षिज्ञानस्य सत्यासत्यविषयतया प्रामाण्यानियमात् अप्रामाण्यमिति वदन्ति ।

अत्र पुनः संशयः – अद्वैतमते देशान्तरीयरजतम् – सत्यरजतम् अविद्याकार्यमध्यस्तं चेत्यतः शुक्तिरूप्यस्य ततो वैलक्षण्यं कथमिति। एतत् समाधानमेवमुच्यते – नैयायिकाः सत्यत्वाविशेषे अपि केषाञ्चित् क्षणिकत्वम् इतरेषां पुनः स्थायित्वमित्यत्र यदुक्तं नियामकं तदेव वेदान्तिनापि क्रियते। अथवा एवमपि समाधानं भवितुमर्हति यत् घटाद्यध्यासे अविद्यैव हेतुः। शुक्तिरजताध्यासे तु काचादयः अपि दोषाः संभवन्ति। अतः आगन्तुकदोषजन्यत्वं प्रातिभासिकत्वे प्रयोजकम्।

स्वप्नविषये संशयः जायते – स्वप्नावस्थायाम् रथादिना सह तदधिष्ठानत्वेन देशविशेषो अपि उपलभ्यते। सः च तदा असन्निकृष्ट इति प्रातिभासिकदेशः स्वीकार्यो भविष्यति। तथा सति रथादीनमध्यासः कुत्र भवति इति संशयः। तत्समाधानमुच्यते – स्वयंप्रकाशमानं चैतन्यमेव रथादीनामधिष्ठानमिति अभ्युपगमः। प्रतीयमानः रथादिः अस्तीत्येव प्रतीयते, तस्मात् सद्रूपं चैतन्यमेव तदधिष्ठानम्। देविशेषः अपि प्रातिभासिकः चेतन्ये अध्यस्तः एव।

इदानीं शुक्तिरजतनाशः कथमिति उच्यते – शुक्त्यवच्छिन्नतूलाविद्याकार्यं शुक्तिरूप्यमिति स्वीकारे इयं शुक्तिः इति ज्ञानानेन शुक्तयज्ञाननिवृत्तौ रजतनिवृत्तिः। मूलाविद्यामाश्रित्य रजतज्ञानमितिपक्षे तस्यः ब्रह्मज्ञानमार्निवृत्तिः इत्यतः शुक्तिज्ञानेन शुक्तिज्ञानात् निवृत्तिरेव भवति, न बाधः।

33. जगतः जन्मक्रमः। सर्गादौ – तदैक्षत बहुस्यां प्रजायेय इति श्रुत्यनुसारं सङ्कल्पः। ततः आकाशादूनि पञ्चभूतानि जायन्ते। ततः इन्द्रियाणि। अपञ्चीकृतभूतेभ्यः लिङ्गशरीरं पञ्चीकृतेभ्यश्च स्थूलशरीरं च जायते।